# श्री आदिवराह स्तोत्रं

नमस्ते देवदेवेश वराहवदनाऽच्युत ।
क्षीरसागरसंकाश वज्रशृंग महाभुज ॥ 1

उद्धृतास्मि त्वया देव कल्पादौ सागररांभसः ।
सहस्रबाहूना विष्णो धारयामि जगंत्यहम् ॥ 2

अनेकदिव्याभरणयज्ञसूत्रविराजित ।
अरुणारुणांबरधर दिव्यरत्नविभूषित ॥ 3

उद्यद्भानुप्रतीकाशपादपद्म नमो नमः ।
बालचंद्राभदंष्ट्राग्र महाबलपराक्रम ॥ 4

दिव्यचंदनलिप्तांग तप्तकांचनकुंडल ।
इंद्रनीलमणिद्योतिहेमांगदविभूषित ॥ 5

वज्रदंष्ट्राग्रनिर्भिन्न हिरण्याक्षमहाबल ।
पुंडरीकाभिरामाक्ष सामस्वनमनोहर ॥ 6

श्रुतिसीमंतभूषात्मन् सर्वात्मन् चारुविक्रमः ।
चतुराननशंभुभ्यां वंदिताऽऽयतलोचना ॥ 7

© 2022 Vedam Nadam 

सर्वविद्यामयाकार शब्दातीत नमो नमः ।
आनंदविग्रहाऽनंत कालकाल नमो नमः ॥ 8

॥ इति श्री भूदेवी कृतं श्री आदिवराह स्तोत्रं संपूर्णम् ॥